# 2023

## SANSKRIT

Paper : SKT–HC–2016

**[ Classical Sanskrit Literature (Prose) ]**

( Honours Core )

*Full Marks* : 80

*Time* : 3 hours

*The figures in the margin indicate full marks for the questions*

## UNIT—I

**( Śukanāsopadeśa )**

( *Marks* : 25 )

**1.** Answer the following questions : 1×5=5
अधोलिखितानां प्रश्नानामुत्तरं देयम्—

*(a)* Who is the heroine of the *Kādambarī*?
'कादम्बरी' इति काव्ये नायिका का?

*(b)* Under which king Śukanāsa was a minister?
शुकनासः कस्य राज्ञः मन्त्री आसीत्?

*(c)* When did Śukanāsa advise?
कस्मिन् क्षणे शुकनासः उपदेशं दत्तवान्?

(d) ''पातालगुहेव तमोबहुला''

Who is referred to as 'तमोबहुला' here?

अत्र 'तमोबहुला' इत्यनेन का निर्दिश्यते?

(e) How could Bhīma win the heart of Hiḍimbā?

भीमेन कथं हिडिम्बायाः हृदयं जितम्?

**2.** Translate any *one* of the following : 5

निम्नलिखितयोः **एकस्य** अनुवादः करणीयः—

(a) आलोकयतु तावत् कल्याणाभिनिवेशो लक्ष्मीमेव प्रथमम्। इयं हि सुभटखड्गमण्डलोत्पल-वन-विभ्रम-भ्रमरी लक्ष्मीः क्षीरसागरात् पारिजातपल्लवेभ्यो रागम्, इन्दुशकलादेकान्तवक्रताम्, उच्चैःश्रवसश्चञ्चलताम्, कालकूटान्मोहनशक्तिम्, मदिराया मदम्, कौस्तुभमणेरतिनैष्ठुर्य्यम्, इत्येतानि सहवास-परिचयवशाद्-विरह-विनोद-चिह्नानि गृहीत्वेवोद्गता।

(b) एवंविधयापि चानया दुराचारया कथमपि दैववशेन परिगृहीताः विक्लवा भवन्ति राजानः, सर्वाविनयाधिष्ठानताश्च गच्छन्ति। तथाहि, अभिषेकसमय एव चैषां मङ्गलकलसजलैरिव प्रक्षाल्यते दाक्षिण्यम्, अग्निकार्य्य-धूमेनेव मलिनीक्रियते हृदयम्, पुरोहित-कुशाग्र-सम्मार्जनीभिरिवापनीयते क्षान्तिः...।

**3.** Explain : 10

व्याख्यायताम्—

''गद्यं कवीनां निकषं वदन्ति।''

*Or/ अथवा*

Assess the *Kādambarī* as a Kathā type of Kāvya.

'कादम्बरी' इति काव्यं कथा न वा, निर्णियताम्।





**4.** Bring out the implication of any *one* of the following : 5

निम्नलिखितस्य **एकतरस्य** अर्थः स्पष्टीकरणीयः—

(a) तोयराशिसम्भवापि तृष्णां संवर्धयति।

(b) पुरुषोत्तमरतापि खलजनप्रिया।

## UNIT—II

**(Viśrutacaritam )**

( *Marks* : 25 )

**5.** Write a note on the style of Daṇḍin. 10

दण्डिनः रचनाशैलीविषयकं निबन्धनं लिख्यताम्।

*Or/ अथवा*

Who was पुण्यवर्मा? Describe him following your text.

को नु पुण्यवर्मा? पाठ्यमनुसृत्य तस्य वर्णनमुपस्थापय।

**6.** Translate any *one* of the following : 5

निम्नलिखितयोः **एकस्य** अनुवादः करणीयः—

(a) अथाहमभ्येत्य व्रतत्या कयाऽपि वृद्धमुत्तार्य तं च बालं वंशनालीमुखोद्धृताभिरद्भिः फलैश्च पञ्चषैः शरक्षेपोच्छ्रितस्य लकुचवृक्षस्य शिखरात्पाषाणपतितैः प्रत्यानीतप्राणवृत्तिमापाद्य तरुतलनिषण्णस्तं जरन्तमब्रवम्—तात, क एषः बाल? को वा भवान्? कथं चेयमापदापन्ना इति।

(b) दिव्यं हि चक्षुर्भूत-भवद् भविष्यत्सु व्यवहित-विप्रकृष्टादिषु च विषयेषु शास्त्रं नामाप्रतिहतवृत्ति। तेन हीनः सतोरप्यायतविशालयोलोचनयोरन्ध एव जन्तुरर्थदर्शनेष्व-सामर्थ्यात्। अतो विहाय बाह्यविद्यास्वभिषङ्गमागमय दण्डनीतिं कुलविद्यां तदर्थानुष्ठानेन चावर्जितशक्तिसिद्धिरस्खलितशासनः शाधि चिरमुदधि-मेखलामुर्वीम्।

7. Answer the following questions : 2×5=10

अधोलिखितानां प्रश्नानामुत्तरं देयम्—

(a) Who was Vasurakṣita? Write about him in few words.

वसुरक्षितः कः? संक्षिप्ततया परिचयं ददातु।

(b) Who was the son of Punyavarmā? How was he as a ruler?

को नु पुण्यवर्मणः पुत्रः? प्रजापालने सः कीदृशः आसीत्?

(c) What is meant by 'पुरुषायुषम्'? Write in few words.

'पुरुषायुषम्' इत्यस्य कोऽर्थः? संक्षिप्तटिप्पणी देया।

(d) Derive the following words (any *two*) :

निम्नलिखितशब्दानां व्युत्पत्तिः लेखनीया (द्वयोः)—

क्लिश्यन्; अगदत्; पिपासाम्; आपन्ना; अनुष्ठानम्।





(e) Name and expound the Samāsas of any *two* of the following :

निम्नलिखितसमासानां नामोल्लेखपूर्वकं व्याख्या कार्या (द्वयोः)—

तरुतलनिषण्णः; पाषाणपतितैः; अदत्तकर्णः; उत्थानशीलः; शास्त्रप्रमाणकः।

## UNIT—III

**(Origin and Development of Prose, Important Prose Romances and Fables )**

( *Marks* : 30 )

8. Answer the following questions : 1×5=5

निम्नलिखितानां प्रश्नानाम् उत्तरं देयम्—

(a) Name the prose romance written by Subandhu.

सुबन्धुरचितस्य गद्यकाव्यस्य नाम देयम्।

(b) Who is the author of the *Puruṣaparīkṣā*?

'पुरुषपरीक्षा' इति ग्रन्थस्य प्रणेता कः?

(c) *Harṣacarita* is a Kathā type of prose romance.

( Write True or False )

'हर्षचरितम्' एका कथा।

( शुद्धम् अशुद्धं वा लिखत )

*(d)* Who is the author of the *Siṁhāsana-dvātriṁśikā*?

'सिंहासनद्वात्रिंशिका'-ग्रन्थस्य प्रणेता कः?

*(e)* In which century Bāṇabhaṭṭa flourished?

को नु बाणभट्टस्य समयः?

**9.** Answer any *two* of the following : 10×2=20

अधोलिखितानां कस्यापि द्वयस्य उत्तरं देयम्—

*(a)* Write a note on *Pañcatantra*.

पञ्चतन्त्रमलम्ब्य टिप्पणी देया।

*(b)* Write on the origin and growth of Sanskrit prose literature.

संस्कृतगद्यकाव्यस्य उत्पत्तिं तथा क्रमविकाशमवलम्ब्य आलोचनं कार्यम्।

*(c)* Write down the salient features of the *Vāsavadattā*.

'वासवदत्ता' इति ग्रन्थस्य वैशिष्ट्यानि लिखत।





*(d)* Discuss about the life and works of Daṇḍin.

दण्डिनः जीवनविषयकं तथा कर्मविषयकं टिप्पणी देया।

**10.** Write a short note on any *one* of the following : 5

कस्यापि एकस्य टीका लेखनीया—

तिलकमञ्जरी ; शुकसप्ततिः।

★★★